**International Journal of Research in Social Sciences**
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# जातकाभरणानुसारं सप्तमभावविमर्शः

**डॉ. विश्वरञ्जनपति**
*सहाचार्यः*
*ज्योतिषविभागः, विभागाध्यक्षः*
*केन्द्रीयसंस्कृतविश्वविद्यालयः*
*श्रीसदाशिवपरिसरः, पुरी*

महती अस्माकं भारतीयपरम्परा सृष्टेः प्रारम्भकालात् इयमविच्छिन्नया धारया जद्दुतनयावत् प्रवहति प्लावयति जनमानसं निवारयति च कलिकलुषसम्भूतानां मानवानामन्तर्गतदुष्टमलानि। अस्माकमियं परंपरा स्वकीयया महनीयचिन्ताधारया समाजे जनसमुहे वा विधिव्यवस्थायाः श्रुंखलां प्रतिष्ठापयति। आवहमानकालात् अस्माकं शास्त्रकारैः ऋषिमुनिमहर्षिभिः तपोनिष्टसाधकैश्च प्रतिपादितं यत् मानवजीवनं शतवर्षात्मकम् तदुक्तं यजुर्वेदे कुर्वन्नेवेह कर्माणि जीजिविषे शतं समाः'' इति। शतवर्षात्मकमानवजीवनमपि ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसन्यासभेदेन स्मृतिशास्त्रकारैः चतुर्धा प्रविभक्तम्। एतेषु चतुर्षु आश्रमेषु गृहस्थाश्रमः अन्यतमः श्रेष्ठतरश्च वर्तते। यतोहि एतस्मिन् सर्वेऽपि अन्ये आश्रमाः आश्रयन्ति सम्पादयन्ति च स्वजीवचर्याम्। मन्वादिषु स्मृतिग्रन्थेषु अस्य महन्महत्वं प्रविचारितं वर्तते। अस्य आश्रमस्य महिमानमित्थं प्रतिपादयति वृहद्दैवज्ञरञ्जनम् -

वानप्रस्थो ब्रह्मचारी यतिश्चैव तथा द्विजः।
गृहस्थस्य प्रसादेन जीवन्त्येते यथाविधिः।
गृहस्थ एव यजते गृहस्थतप्यते तपः।
ददाति च गृहस्थश्च तस्माच्छ्रेयो गृहाश्रमी [१]।।

पुनश्च दक्षस्मृतावपि उक्तमस्ति गृहाश्रमः यद्यपि सर्वेभ्यः आश्रमेभ्यः श्रेयस्करः तथापि गृहाश्रमः पत्नीमूलः वर्तते पत्न्या विना अयमाश्रमः न कदापि सुखदायको भवितुमर्हति। अस्मात् कारणात्

**International Journal of Research in Social Sciences**
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

प्रत्येकेन मनुष्येण पत्नी-मार्गणं कर्तव्यम्। अपरिचितेषु जनसमुहेषु कस्यापि बालिकाया: विवाहार्थं स्थिरीकरणमवश्यमेव कष्टतरव्यापारं भवेत्। तदुक्तम् -

पत्नीमूलं गृहं पुंसां यदिच्छंन्दानुवर्तिनी।
गृहाश्रमात् परं नास्ति यदि भार्या वशानुगा।।

करपीडानार्थमुपलब्धेऽपि भार्या सा पतिमनोहारिणी वशानुगा प्रियबादिनी भविष्यति न वा इत्यादय: नैका: शंका: प्रबर्द्धन्ते मनुष्याणां मनांसि। तत् विजिज्ञासार्थं नैकान् सामाजिकान् उपायान् अबलम्बन्ते मानवा:। तेषु उपायेषु ज्योतिश्शास्त्रं सर्वतोऽधिकं विश्वसनीयमास्थाभाजनं च भवति। सर्वेऽपि मनुष्या: विवाहप्रकरणे समायाते शंकासमाधातुं कस्यापि दैवज्ञस्य साह्यमाचरन्ति। ज्योतिश्शास्त्रे सुमहत्या: अस्या: शंकाया: समाधानम् अतीव सरलया भावगाम्भीरया सैद्धान्तिकपद्धत्या प्रतिपादितं वर्तते। ज्योतिषशास्त्रं यद्यपि वेदांगान्तर्भुक्तं तथापि एतत् सिद्धान्तसंहिता होरा भेदेन त्रिधा प्रविभक्तं वर्तते। कतिपया: केरली शकुनमप्यत्र भेदरूपेण गणयन्ति।

विद्यमानेष्वपि अवान्तरविभागेषु सिद्धान्तफलितद्येति भागद्वयं सर्वेऽपि स्वीकुर्वन्ति। गाणितिकदृष्ट्या स्फुटसिद्धान्तदानं सिद्धान्तज्योतिषस्य कर्म भवति परं ग्रहाणामवस्थितिं विचार्य तेषां फलकथनं फलितज्योतिषस्य कार्यमितिप्रतिपादयन्ति शास्त्रकारा:। फलितज्योतिषानुसारं जन्मकुण्डल्यां द्वादशभावा: भवन्ति ते यथा -

तनुर्धनं च सहज बन्धुपुत्रोरिपुस्तथा।
पत्नीनिधनधर्मश्च कर्मचायोव्ययोऽपि च।।
एतान्येव विजानीयात् लग्नादौ च विचक्षण:।
एभितर्द्वादशभिर्युक्तो कोष्ठीकार्या यतो बुधै:।।

अर्थात् ज्योतिश्शास्त्रानुसारमेते द्वादशभावा: मनुष्यस्य समग्रं सुखं दु:खं च द्योतयन्ति। ज्योतिशास्त्रेषु नैकानि ऋषिप्रणीतानि शास्त्राणि भवन्ति तेषु श्रीदुडुण्ढिराजदैवज्ञविरचितं जातकाभरणमन्यतमम्। फलितज्योतिषेऽस्य अस्यस्थानमन्यतमं वर्तते। अस्मिन् जन्मपत्रिकाया:

International Journal of Research in Social Sciences
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

शुभाशुभफलप्रदायकाः समस्तविषयाः विचारिताः सन्ति। यद्यपि अस्मिन् नैके भावाः विचारिताः सन्ति तथापि तेषु विचार्यमाणविषयेषु सप्तमभावविचारः अनन्यप्रतिभासम्भूतः इति मन्यते। लग्नादिद्वादशाभावानां नैकानि नामान्तराणि अपि भवन्ति। तेषु सप्तमभावस्य पर्यायवाचिनामानि अपि सन्ति। फलदीपिकानुसारं सप्तमभावस्य नामानि यथा - ''जामित्रचित्तोत्थमदास्तकामान् द्युनाध्वलोकान् पतिमार्गभार्या'' (फलदीपिका, राशिभेदः १ ३) अर्थात् जामित्र-चित्तोत्थ- मद-अस्त-काम-द्युन-अध्व-लोक-पति-भार्या-इमानि नामानि सप्तमभावस्य भवन्ति।

**सप्तमभावात् चिन्तनीयविषयाः**

सप्तमभावे के विषयाः चिन्तनीयाः इति प्रसङ्गमाधारीकृत्य शास्त्रकारः ढुण्ढिराजः प्रतिपादयति यत् आत्मनः शत्रुः, क्रूरकार्यं, रोगः, चिन्ता, आशङ्का, मातुलेत्यादयः विषयाः यद्यपि षष्ठभावात् विचारिताः भवन्ति परं सप्तमभावात्-युद्धक्षेत्रम्, वणिक्क्रिया, स्त्रीविचारः, मरणविचारः भूमिसम्बन्धी विचारः प्रबासागमनविचारश्च सप्तमभावात् करणीयः। उक्तं च -

रणाङ्गनंचापि विणिक्क्रियाश्च जायाविचारागमनप्रमाणम्।
शास्त्रप्रवीणैर्हिविचारणीयं कलत्रभावे किल सर्वमेतत् [२]।।

जातकपारिजातः सप्तमभावात् पुत्रसौख्यमपि चिन्तनीयमिति वर्णयति तदुक्तमस्ति -

यात्रापुत्रकलत्रसौख्यमखिलं संचिन्तयेत्सप्तमात्।
दुक्तं पुत्रसुखासुखागमफलं सर्वं च यत्तद्वदेत् [३]।।

जातकरत्नं सप्तमभावात् पुत्र, स्त्री, विवाह, दधिः, गूड, क्षीर, मूत्राशय, नष्टधनादिविषयाः सप्तमभावात् विचारणीयाः इति प्रस्तौति।

युवतिपदादुद्वाहं भार्या पति सूप दधि गुडक्षीरम्।
आगमनं सरिदातिं मूत्राशयं च नष्टधनम् ।।

एभिः प्रमाणैरवगम्यते यत् प्रत्येकस्य पुरुषस्य कृते स्त्रियाः। स्त्रियः कृते पुरुषस्य विचारः सप्तमभावात् करणीयः। स्त्री कथं भवेत् तस्याः स्वरूपं, स्वभावः, विवाहकालः, शुभलक्षणानि इत्यादिनि तथ्यानि सप्तमभावात् ज्ञातुं शक्यन्ते। तथैव पुरुषस्यापि विचारः करणीयः।

**सप्तमभावस्य शुभाशुभत्वम् -**

सप्तमभावः जन्मकुण्डल्यां शुभफलदायकः अथवा अशुभकारकः तस्य जिज्ञासा आदौ करणीया। द्वादशभावेषु सप्तमः यदि शुभराशौ आगच्छति तत्रापि शुभग्रहस्यावस्थानं चेत् तदा अयं भावः जातकस्य कृते शुभफलदायको भवेत्। अर्थात् वैवाहिकजीवनं चरमसुखदायकं पुत्रपौत्रादीनां सुखावाप्तिश्च स्यात् यदि अयंभावः पापशशिगतः पापैश्चाक्रान्तः भवति चेत् तदा विपरीतफलं जायते। अर्थात् प्रियायाः वियोगः, विलम्वविवाहः दृष्टाभार्या, पुनर्भुविवाह इत्यादिनि नैकानि अशुभफलानि जायन्ते। जातकः कदा मम विवाहभवेदिति चिन्तयाः विवाहिताः पुरुषाः दुष्टाभार्यायाः ताडनया आतुराः जायन्ते कदाचित् बहुविवाहः अपि सम्भवति। तदुक्तमस्ति जातकाभरणे -

सौम्यैर्युतं सौम्यभं सौम्यदृष्टं जायागेहं देहिनामङ्गनाप्तिम्।
कुर्यान्नूनं वैपरीत्यादभावोमिश्रत्वेन प्राप्तिकाले प्रलापः[४]।।

पुनश्च यदि सप्तमभावः शुभग्रहस्य नवमांशे, द्वादशांशे वा निपतति चेत् तदा नातिचिरकालेन पुरुषस्य कृते भार्यावाप्तिः जायते इति तत्रैव प्रतिपादितमस्ति।

सूतौ कलत्रस्य नवांशको वा
द्विषट्कभागस्त्रिलवः शुभानाम्।
अनेन योगेन हि मानवानां
स्यादंगनानामचिरादप्राप्तिः[५]।।

जातकपारिजातानुसारं लग्नात् पञ्चमसप्तमभावः तथैव चन्द्रमाः अपि यदि नवमेशेन दृष्टः भवति चेत् तदा शुभफलावाप्तिः उत्तमाभार्या प्राप्तिश्च जायते। तथैव सप्तमभावः स्वस्वामिना दृष्टः अथवा

**International Journal of Research in Social Sciences**
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

शुभग्रहै: वीक्षित: भवति चेत् तदा भाववृद्धि: जायते अपेक्षितं शुभफलमवाप्नोति जातक:। अयं भाव: यदि पापयुक्त: पापाक्रान्तश्च भवति चेत् तदा दु:खाप्ति: भवति तदुक्तं जातकपारिजाते।

शुभाधिपयुतेक्षिते सुतकलत्रभे लग्नतो।

विधोरपि तयो: शुभं त्वितरथा न सिद्धिस्तयो:[६]।।

**स्त्रीसंख्या निरूपणम्**

कदाचित् मनुष्या: मिथ विवहन् परस्परं विवदन्ति कदाचिच्च स्त्रिया: विच्छेद: मरणं च जायते दु:खाभिभुत: मानव: कदाचित् पुन: विवहति । पुनश्च कुत्रचित् पुमान् स्त्री विद्यमानेऽपि अपरां नारीं विवहति तस्य भार्याद्वयं कस्यापि तिस्त्र: भार्या: सम्भवन्ति। तस्मात् विवाहकाले स्त्रीपुंस: कथं पाणिग्रहणं भवेदिति अस्माभि: चिन्तनीयम्। जातकाभरणानुसारं यदि लग्नात् व्यये, षष्ठे, भावे सूर्य: चन्द्रमसौ भवत: तदा मानवस्य एका भार्या, एकपुत्रश्च भवति। तदुक्तमस्तिजातकाभरणे -

लग्नाद् व्ययेवारिपुमन्दिरे वा

दिवाकरेन्दू भवतस्तदानीम्।

स्यान्मानवस्यात्मज एक एव

भार्यापि चैकेति वदन्ति सन्त:[७]।

पुनश्च गण्डान्तकाले जन्म लब्धवत: पुंस: सप्तमे शुक्र: लग्ने शनि: सप्तमभाव: शुभदृष्टिवर्जितश्चेत् तदा पुंस: वन्ध्या स्त्री भवतीति अस्य शास्त्रस्याभिमतम्। यस्य कस्यापि पुंस: सप्तमव्ययभाव: पापयुक्त: पञ्चमे चन्द्रमस: अवस्थिति: च पुरुषं स्त्रिया रहितं करोति यदि विवाह: भवति चेत् तदा पुत्रोऽपि न भवति। इत्थं मदनभाव: पापाक्रान्तभवति चेत् तदा स्त्रिया रहित: जन: आजीवनं दु:खदावानले सन्तप्त: भवति । सप्तमात् इन्द्रियसुखं विचार्यते तत् सुखं न लभतेऽसौ जन:। तदुक्तम् -

गण्डान्तकालेऽपि कलत्रभावे भृगो: सुते लग्नगतेऽर्कजाते।

वन्ध्यापति: स्यान्मनुजस्तदानीं शुभेक्षितं नो भवनं खलेन।।

**International Journal of Research in Social Sciences**
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

लग्नात् व्ययेवा रिपुमन्दिरेवा दिवाकरेन्दु भवतस्तदानीम्।
स्यान्मानवस्यात्मजएक एव भायोपि चैकेति वदन्ति सन्तः।।

पुनश्च सप्तमे अथवा विषमस्थानस्थितः गुरुचन्द्रबुधभार्गवाः स्व स्व स्वभावानुसारं पुरुषाय पत्नीं प्रयच्छन्ति। अर्थात् प्रोक्तेषु चतुर्षु ग्रहेषु यस्य ग्रहस्य यः स्वभावः तादृशी स्त्री तस्मै मिलति। अस्मिन् भावे यथा संख्यकाः ग्रहाः भवन्ति तथैव स्त्रीणां संख्या भवति। कलत्रभावे नवांशतुल्याः यथा संख्यकानां ग्रहाणां दृष्टिः भवति तथैव स्त्रियाः संख्या भवति । तदुक्तम् –

कलत्रभावे च नवांशतुल्या नरस्य नार्योग्रहबीक्षणाद्वा।
एकैव भौमार्कनवांशके च जामित्रभावस्वबुधार्कयोर्वा[८] ।।

सप्तमभावः यदि शुक्रस्य वर्गेऽवस्थितः भवति तस्मिन् यदि शुक्रस्य दृष्टिः भवति चेत् तदा यस्य कस्यापि पुरुषस्य कृते बहुपत्नीविवाहः भवति। सोऽपि कान्ता मनोहारी पुरुषः भवति। यदि सप्तमभावे भौमः भवति तदापुरुषः स्त्रीहीनः भवति भौमोपरि यदि शनेः दृष्टि स्याच्चेत् तदा विवाहितस्यापि पुरुषस्य स्त्री म्रीयते।

जातकपारिजाते उक्तमस्ति शुक्रचन्द्रमसोः सप्तमभावे शनैश्चरमंगलयोः अवस्थितिः जातकः स्त्रीपुत्ररहितः जायते पुनश्च तत्रैव काचितमस्ति सप्तमभावे नपुंसकग्रहस्थावस्थितिः एकादशभावे यदि द्वयोः ग्रहयोः अवस्थानं भवति चेत् तदा जातकस्य भार्याद्वयं भवेत्। सप्तमेशः यदि शुक्रेणवृतः द्विस्वभावराशौ भवतः चेत् - तदा पत्नीद्वयमपि भवतः। सप्तमेशेन अथवा शुक्रेण सह सम्मिलितानां ग्रहाणां संख्यानुसारं स्त्रीसंख्या भवेदिति जातकपारिजातस्य विचारः -

भौमार्क्यस्ते भृगुजशशिनोर्दारहीनोऽसुतो वा।
क्लीवेऽस्ते वा भवति भवगौ द्वौ ग्रहौ स्त्रीद्वयं स्यात्।।
द्वन्द्वर्क्षांशे मदपतिसितौ तस्य जायाद्वयं स्यात्।
ताभ्यां युक्तै गगननिलयैर्दारसंख्यां वदन्तु[९] ।।

सप्तमभावस्य नवमांशे प्रति यथा ग्रहाणां दृष्टि: भवति तेषां संख्यानुसारं स्त्रिय: भवन्ति। अथवा सूर्यमंगलयो: नवांशेऽथवा सप्तमभावे बुधसूर्ययो: अवस्थिति: एका पत्नी संसूचयति तदुक्तम् -

कलत्रभावे नवांशतुल्या नरस्य नार्यो ग्रहवीक्षणाद्वा।
एकेव भौमार्कनवांशके च जामित्रभावस्थबुधार्कयोर्वा[१०] ।।

**भार्याया: स्वरूपं स्वभावश्च**

शास्त्रकारा: कथयन्ति यदि भार्या दुष्टा अथवा पतिविरोधिनी भवति चेत् तदा दाम्पत्यजीवनं नष्टं दु:खदायकं च भवति। सा भार्या सर्पसमा भयंकरा भवति।

दुष्टाभार्या शहोमित्र भृत्यश्चोत्तरदायक:।
ससर्पेण गृहेवास: मृत्युरेव न संशय:[११] ।।

अर्थात् पाणिग्रहणात् पूर्वं कस्यापि पुरुषस्य स्त्रिया: अपि स्वभावपरिक्षणं करणीयम्। ढुण्ढिराज: वदति यदि कश्चनस्य जन्मकाले सप्तमभावे शने: मंगलस्य वा (वर्गेषु) भवति अथवा एतस्मिन् भावे तेषां युति: अथवा दुष्टि भवति तदा जातकस्य पत्नी व्यभिचारिणी भवति तथा स्वयमपि व्यभिचारदोषेण युक्त: भवति।

प्रसूतिकाले च कलत्रभावे यमस्य भूमितनयस्य वर्गे।
ताभ्यां प्रदृष्टे व्यभिचारिणीस्याद्भर्तापितस्या व्यभिचारकर्ता[१२] ।।

फलदीपिकानुसारं द्वितीयसप्तमव्ययेशा: यदि जीवेन दृष्टा: भवन्ति कोणचतुष्टयेषु यदि विद्यमाना: भवन्ति चेत् पुनश्च सप्तमेश: यत्र तिष्ठति तस्मात् अस्तभावे यदि शुभग्रहा: भवन्ति तर्हि तस्य जातकस्य भार्या सुशीला साध्वी पतिव्रता च भवति। पुत्र पौत्रान्विता च जायते तदुक्तमस्ति फलदीपिकायाम् -

**International Journal of Research in Social Sciences**
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

कुटुम्बदरव्ययराशिनाथा जीवेक्षिता: कोणचतुष्टयस्था:।

दारेश्वराद्वित्तकलत्रलाभे सौम्या: कलत्रं ससुतं सुखादयम्[१३]।।

जातकपारिजातानुसारं पुरुषस्य सप्तमे भावे स्त्रिया: प्रथमे भावे वा यदिशुभग्रहा: भवन्ति चेत् जातकस्य पत्नी सद्गुणाढ्या: सुन्दरी च भवति पुनश्च कर्कनवांशजाता कन्या पतिनाशकारिणी भवति। यदि तत्र चन्द्रमा बलान्वित: भवति चेत् पत्नी सच्चरित्रा गुणाढ्या भवति ।

शुभांशराशौ यदि सद् गुणाढया शुभे क्षिते चारुतरं कलत्रम्।

चन्द्रांशके र्दुवलचन्द्रराशौ जायापति सव तु साध्वी[१४]।।

चन्द्रमा यद्रि सूर्यस्य नवमांशे तिष्ठति पुनश्च सप्तमभावेऽवस्थानं करोति तदा जातकस्य भार्या कुलटाभवति। स एव चन्द्रमा यदि स्वोच्च गृहे शुभावलोकित: तिष्ठति चेत् भार्या सच्चरित्रा भवति। यदि चन्द्रमा लग्नसप्तमभावस्थ स्वनीचराशौ तिष्ठति तदा भार्या धर्मरहिता दु:शीला भवति। कलत्राधिप: यदि केन्द्रे शुभांशे शुभग्रहवीक्षित: तिष्ठति तदा तस्य पत्नी व्रतपरायणा भवति।

कलत्राधिपतौ केन्द्रे शुभग्रहानीरीक्षिते।

शुभांशे शुभराशौ वा पत्नीव्रतपरायणा[१५]।।

कस्यापि पुरुषस्य विवाहात् पूर्वं कन्याकथं भवेदिति चिन्तयन्ति पारिवारिका:। तदाज्योतिविद: सप्तमेशस्य वर्णं सप्तमराशे: स्वरूपं सप्तमस्थस्य ग्रहस्य स्वरूपं विचार्य पत्न्यास्वरूपं निर्द्धारयन्ति चन्द्रस्थितराशे: सकाशादपि पत्न्या: स्वरूपचिन्तनं करणीयम्। यदि सप्तमभावे दिनमणिचन्द्र-वृहस्पतिभूमिजा: भवन्ति तर्हि पत्नी गौरवर्णा भवेत्। बुधशुक्रौ भवत: चेत् पत्नी नातिशुभ्रा भवेत् शनिराहुकेतव: मदनस्थिता: पुरुषे कृष्णकायपत्नी ददति इति वाच्यम्। स्वरूपविचारसमये सप्तमभावान्तर्गतानां राशीनामपि स्वरूपं चिन्तनीयम्।

**स्त्रीजातकानुसारं पतिस्वरूपं पौरुषत्वं च**

यथा पुरुषस्य जन्मकुण्डल्याधारेण कन्यकाया: रूपनिरूपणं क्रियते तथैव कस्यापि बालिकाया: अपि जन्मपत्रीं विलोक्य तस्या: पत्या: स्वरूपं वक्तुं शक्यते। यस्या: कन्यकाया:

**International Journal of Research in Social Sciences**
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

जन्मलग्नात् सप्तमं चन्द्रमादपि सप्तमं स्थानं ग्रहरहितं शुभग्रहदृष्टिवर्जितं च अस्ति तस्याः पति कुकर्मणि तत्परः भवति। बुधशनैश्चरौ भवतः चेत् नपुंसकः जायते। सप्तमभावः यदि चरराशौ भवति तर्हि तस्याः स्वामी सदापरदेशे वसति। सूर्यः सप्तमे विद्यमाने सति सा नारी पति परित्यक्ता भवति । सप्तमे मंगलः स्वल्पेनैव कालेन वैधव्यं प्रयच्छति सप्तमे शनैश्चरः कन्यकायाः विवाहविलम्वस्य कारणं भवति । अत्रापि चन्द्रलग्नात् शुभाशुभत्वं विचारणीयम्। तदुक्तं - वृहज्जातके –

शून्ये कापुरुषोऽबले स्तभवने सौम्यग्रहावीक्षिते
क्लीवोऽस्ते बुधमन्दयोश्चरगृहे नित्यं प्रवासान्वितः।
उत्सृष्टा तरणौ कुजे तु विधवा बाल्येऽस्तराशिस्थिते
कन्यैवाशुभवीक्षितेऽर्कतनये द्युने जराङ्गच्छति[१६] ।।

जातकपारिजातानुसारं स्त्रियाः कुण्डल्यां सप्तमे यदि दिनकर वर्तते तर्हि तस्याः पति कामी गौरवर्णः क्रोधदृष्टिसम्पन्नः जायते तथा चन्द्रे विद्यमाने पतिरूपगुणान्वितः कृशशरीरः भोगो रोगार्तः भवति । मंगलः वर्तते चेत् नम्रः क्रूरकर्मरतः, आलस्य युक्तः वाक्पटुः संरक्तकान्ति भवति। सप्तमस्थबुधः विद्यावित्तगुणप्रपञ्चरसिकं पतिं प्रयच्छति गुरुसप्तमभावे स्थितः विभवसम्पन्न तेजदीप्तकरकामिनं पतिं ददाति ।

शुक्रः यदि कन्याजन्मपत्रिकायां सप्तमेभावे तिष्ठति चेत् तस्याः पतिः नित्यं विनोदकेलिचतुरः तेजोवान् ज्ञानी चतुरश्च भवति । सप्तमे शनिः बालिकायाः पति वयस्कः कृष्णशरीरः भवति तथा चञ्चलशरीरः भवति तथा चञ्चलशरीरे पापकर्मणिरतः भवितुमर्हति। सप्तमस्थकेतुः मलिनबुद्धिसम्पन्नं पतिं प्रयच्छति। (जातकपारिजातः स्त्रीजातकाध्यायः ५२-५३) वृहज्जातकानुसारं कामिन्याः कुण्डल्यां सप्तमभावः मकरकुम्भयोः भवति चेत् पतिः वृद्धः मूर्खश्च भवति यदि अजूवृश्चिकयोः भवति तर्हि तस्याः पति परस्त्रियाः शंसनं सदा करोति। वृषतुलयोः

**International Journal of Research in Social Sciences**
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

सप्तमभाव: आगच्छति चेत् पति: अतिसुन्दर: भवति । मिथुनकन्ययो: सप्तमभावे वर्तमाने बालिकाया: पति विद्वान् चतुरश्च भवति तदुक्तम् -

वृद्धोमूर्ख: सूर्यज क्षोंशोके वा स्त्रीलोल:
स्यात्क्रोधनश्चावनोये।
शौक्रेकान्तोऽतीवसौभाग्ययुक्तो
विद्वान्भर्तानैपुणश्चैव बौधे[१७]।।

**पत्नीविच्छेदयोगा:**

साम्प्रतिके समाजे मनुजा: धनरूपलावण्यपदपदवीनां मोहवशात् किमपि अविचार्य परस्परं मिथ: विवहन्ति तत: परं परस्परं स्त्रीपुंसयोर्मध्ये घोरतर: कलह: उत्पद्यते। पति: स्त्रिया: स्त्रिय: पत्यु: मुखदर्शनमपि कर्तुं नैव प्रभवन्ति। घोरकलहयुक्ता: अन्ततो गत्वा मानवा: स्त्रियं परित्यक्तुमिच्छन्ति तदनु विवाहविच्छेद: पत्न्या: मरणं मारणं वा संजायते। एतादृशयोग: जन्मपत्रिकासु लक्ष्यते। दैवज्ञढुण्ढिराज: एतादृशयोगमित्थं विनिर्दिशति -

महीसुते सप्तमभावमाते कान्तावियुक्त: पुरुषस्तदा स्यात्।
मन्देनदृष्टे म्रियतेऽपि लब्ध्वा शुभग्रहालोकवर्जितेऽस्मिन्[१८]।।

अर्थात् सप्तमे भावे मंगलभवति चेत् पुरुष: स्त्री हीन: भवति। मन्ददृष्ट: शुभदृष्टिवर्जित: पुरुष: स्त्रियं लब्ध्वाऽपि तां परित्यजति तस्य पत्नी म्रियते वा पत्नीस्थाने यदा राहु: पापद्वयेन वीक्षित: तिष्ठति चेत् एतादृशस्य जातकस्य पत्नीयोग: न भवति कदाचित् भवति चेत् पत्नीनाश: भवति।

पत्नीस्थाने यदा राहु: पापयुग्मेन वीक्षित:।
पत्नीयोगस्तदा न स्यात् भूत्वापि म्रियतेऽचिरात् ।।

यस्य षष्ठस्थाने मंगल सप्तमे राहो: अवस्थानं भवति पुनश्च अष्टमे शनैश्चर: तस्य भार्या म्रियते। तदुक्तमस्ति -

**International Journal of Research in Social Sciences**
Vol. 9 Issue 6, June 2019,
ISSN: 2249-2496 Impact Factor: 7.081
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

षष्ठे च भवने भौम: सप्तमे राहुसंस्थिति:।

अष्टमे च यदा सौरिस्तस्य भार्या न जीवति[१९]।।

एवं विचार्यमाणे सप्तमभावात् मानवजीवनस्य सम्पूर्णमिन्द्रियजन्यसुखविषये सम्यक्ज्ञायते। सप्तमभावात् मानव: आजीवनं कथं इन्द्रियजन्यं सुखं सहभागिताजन्यं जीवनं च कथं यापयिष्यति तद् विषये सम्यगवधार्य स्वात्मन: कल्याणं साधयितुं प्रभविष्यति अत: प्रत्येकेन सामाजिकेन मनुष्येण आदौ एतस्मिन् विषये सम्यक् विचार्य केनापि सह सम्बन्धस्थापनीय: । इति दिक् ।

**टिप्पणी -**

१. शंखस्मृति:
२. जातकाभरणम्, सप्तमभावविचार:-१
३. जातकपारिजात: सप्तमभावफलाध्याय -१/२
४. सप्तमभावविचार:-३
५. तत्रैव, २
६. जा.पारि. सप्तमभावफलभेद: -१
७. जा. भरण स. भा. वि.४
८. जा.भरण सप्तमभाव:-१०
९. जा. पारि. सप्तमभावफलभेद:-५
१०. जातकाभरणम्, सप्तम.१०
११. हितोपदेश:
१२. जातकभरणम्-७
१३. फलदीपिका सप्तमभावफलभेदा,१०
१४. जा.पारि.सप्तमभावफल.८
१५. जातकापारिजात २२
१६. वृ.जा. स्त्रीजात:, ८
१७. बृहज्जातक स्त्रीजात
१८. जा.भरणम्,१२
१९. जातकाभरणम्, सप्तमभाव-१४